कर्म्मा त्रिपरिक्रान्तो मैत्र एष स्तुतो द्विजः” भा० अनु० १४१ अ० ।

**त्रिपर्ण** पु० त्रीणि त्रीणि प्रतिपत्रं पर्णान्यस्याः । १किंशुके । २वनकार्पास्यां स्त्री राजनि० टाप् ङीप् वा । ३शालपर्ण्याम्, लतायां ४पृश्निपर्णीभेदे च स्त्री ङीप् भावप्र० । संज्ञायां कन् । त्रिपर्णिका कन्दालौ “त्रिपर्णी मधुरा शीता श्वासकासविषव्रणान् । विनाशयति सा नित्यं पित्तकोपप्रशान्तिकृत्” राजनि० । समा० द्विगुः । ५ पर्णत्रये स्त्री ङीप् ।

**त्रिपाठ** पु० ६त० । त्रयाणां पदक्रमसंहितानां पाठे ।

**त्रिपाठिन्** पु० त्रीन् पदक्रमसंहिताद्रूपग्रन्थान् पठति पठ–णिनि । वेदानां पदक्रमसंहिताद्रूपग्रन्थाध्यायिनि ।

**त्रिपाण** न० त्रिःकृत्वः पानं उदकपानं यस्य वृत्तौ सुचो लोपः संज्ञात्वात् णत्वम् । त्रिःकृत्वःपायिते १सूत्रभेदे २वल्कले च “तार्प्यं परिधापयति” कात्या० श्रौ० १५।४।७। “तार्प्यशब्दं स्वयमेव व्याकरोति “क्षौमम्” ८। क्षुमा अतसी तस्य विकारः । “त्रिपाणम्” ६ । त्रिःकृत्वः पायितं वा सकृदिति विकल्पः । वयनकाले उदकेन त्रिस्तर्पयित्वा यदूयते सूत्रम् तत्तृप्यम् तस्य विकारस्तार्प्यम् त्रिः पायितैस्तन्तुभिर्व्यूतमित्यर्थः । केचित्त्रिपाणं वल्कलमित्याहुः” कर्कः ।

**त्रिपाद** पु० त्रयः पादा अस्य संख्यापूर्वत्वेऽपि समासान्तविधेरनित्यत्वान्नान्त्यलोपः । १परमेश्वरे “पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि” छा० उ० । भाष्यकारस्तु “त्रिपात् अस्यामृतः दिवीति” छित्त्वा त्रिपाद् त्रयः पादा अस्य सोऽयं त्रिपादिति हलन्तमाह । “नमो द्विशीर्ष्णे त्रिपदे चतुःशृङ्गाय तन्तवे” भाग० ८।१६।२६ । भत्वात् पादस्य पद्भावः । २ज्वरे च “ज्वरस्त्रिपादस्त्रिशिराः षड्भुजो नवलोचनः” हरिवं०१८१अ० ।

**त्रिपाद्** पु० त्रयः पादा अस्य संख्यापूर्वत्वादन्त्यलोपः । १त्रिविक्रमे २विष्णौ तस्य तथात्वकथा यथा “भूयश्चैवाब्रवीदेनं वामनं वटुरूपिणम् । स्वल्पैः स्वल्पमते ! किन्ते पादैस्त्रिभिरनुत्तमम् ; कृत्स्नां ददामि ते विप्र ! पृथिवीं सागरैर्वृताम्” वामन उवाच “न पृथ्वीं कामये कृत्स्नां सन्तुष्टोऽस्मि पदैस्त्रिभिः । एष एव रुचिरग्र्यो मे वरो दानवसत्तम !” वैशम्पायन उवाच “तथाऽस्त्विति बलिः प्रोच्य स्पर्शयामास दानवः । पदानि त्रीणि देवाय विष्णवेऽमिततेजसे । तोये तु पतिते हस्ते वामनोऽभूदवामनः । सर्वदेवमयं रूपं दर्शयामास वै प्रभुः । भूः पादौ द्यौः शिरश्चास्य चन्द्रादित्यौ च चक्षुषी । पादाङ्गुल्यः पिशाचाश्च हस्ताङ्गुल्यश्च गुह्यकाः” हरिवं० २६२ अ० “तस्य विक्रमतो भूमिं चन्द्रादित्यौ स्तनान्तरे । नभः प्रक्रममाणस्य पादमूले व्यवस्थितौ । विष्णोरमितवीर्य्यस्य वदन्त्येवं द्विजातयः” २६३ अ० “क्षितिं पदैकेन बलेर्विचक्रमे नभः शरीरेण दिशश्च बाहुभिः । पदं द्वितीयं क्रमतस्त्रिपिष्टपं न वै तृतीयाय तदीयमण्वपि । उरुक्रमस्याङ्घ्रिरुपर्य्युपर्य्यथो महर्जनाभ्यां तपसः परङ्गतः” भाग० ८।२०।२६ “बलिरुवच “यद्युत्तमश्लोक ! भवान् ममेरितं वचो व्यलीकं सुरवर्य्य ! मन्यते । करोम्यृतं तन्न भवेत् प्रलम्भनं पदं तृतीयं कुरु शीर्ष्णि मे निजम्” ८।२२।२। “इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे” ऋ० १।२२।१७। ३परमेश्वरे च त्रिपादशब्दे छा० उ० वाक्यं दृश्यम् । ४त्रेतायुगधर्मरूपे वृषे “राघवः शिथिलं तस्थौ भुवि धर्मस्त्रिपादिव” रघु० ।

**त्रिपादिका** स्त्री त्रयः पदाः मूलान्यस्याः कप् टाप् । हंसपदीलतायां राजनि० ।

**त्रिपिण्ड** न० त्रीणि पिण्डानि देयान्यत्र । पित्रादित्रयोद्देशेन कर्त्तव्ये १पार्वणश्राद्धे “ततः प्रभृति संक्रान्तावुपरागादिपर्वसु । त्रिपिण्डमाचरेत् श्राद्धमेकोद्दिष्टं मृताहनि” श्रा० त० मत्स्यपु० । समाहारद्विगुः ङीप् । २पित्राद्युद्देशेन पिण्डत्रये स्त्री ।

**त्रिपिब** पु० त्रिभिः कर्णाभ्यां जिह्वया च पिबति स्पृशति जलं पा–क । वार्ध्रीणसे लम्बकर्णे छागभेदे यथाह निगमे “त्रिपिबन्त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम् । वार्ध्रीणसन्तु तं प्राहुर्याज्ञिकाः पितृकर्म्मणि” । “नद्यादौ पयः पिबतो यस्य त्रीणि जलं स्पृशन्ति कर्णौ जिह्वा च त्रिभिः पिबतीति त्रिपिबः” कुल्लू० ।

**त्रिपि(वि)ष्टप** न० मर्त्यपातालापेक्षया तृतीयं पि(वि)ष्टपं भुवनम् वृत्तौ त्रिशब्दस्य तृभागवत् पूरणार्थता । १स्वर्गे अमरः “तत् त्रिपिष्टपसङ्काशमिन्द्रप्रस्थं व्यरोचत” भा० आ० २०६ अ० । २आकाशे शब्दर० । [हला० ।

**त्रिपिष्टप(व)सद्** पु० त्रिपिष्टपे(वे) सीदति सद–क्विप् । देवे

**त्रिपु** पु० स्तेने निघण्टुः । त्रपुरित्यत्र पाठान्तरम् ।

**त्रिपुट** पु० त्रीणि पुटान्यस्य । (खेसारी) १कलायभेदे २शरे, ३तालकयन्त्रे, ४हस्तभेदे शब्दर० । ५तीरे ६गोक्षुरवृक्षे